# केन्द्रीय विद्यालय संगठनम् बेंगलूरु सम्भाग:

## KENDRIYA VIDYALAYA SANGATHAN, BENGALURU REGION

## प्रथम पूर्व-सिद्धता परीक्षा FIRST PRE-BOARD EXAMINATION 2024-25

**कक्षा - दशमी CLASS -X** — **अङ्का: / Marks :80**

**विषय: - संस्कृतम् / Subject-Sanskrit (119)** — **समय:/Time : होरात्रयम् (3:00 Hrs)**

……...........................................................................................................................

**सामान्यनिर्देशा:-**

1. **कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे** 11 **पृष्ठानि मुद्रितानि सन्ति ।**
2. **कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे** 18 **प्रश्ना: सन्ति ।**
3. **अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति ।**
   **क खण्ड: - अपठितावबोधनम्** 10 **अङ्का:** **ख खण्ड: - रचनात्मकं कार्यम्** 15 **अङ्का:**
   **ग खण्ड: - अनुप्रयुक्तं व्याकरणम्** 25 **अङ्का:** **घ खण्ड: - पठितावबोधनम्** 30 **अङ्का:**
4. **प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।**
5. **उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय: ।**
6. **प्रश्नस्य क्रमाङ्क: प्रश्नपत्रानुसारम् एव लेखनीय: ।**
7. **सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।**
8. **प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया:**

.....................................................................................................................................

### ‘क’ खण्ड: - अपठितावबोधनम् – 10 अङ्का:

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**

1. अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत |

पुरा सोमदेवः नाम कश्चन पुरुषः बाल्ये वयसि विद्याध्ययनं न कृतवान् । सः सदा दुर्जनैः सह मिलित्वा कालं यापयति । तस्मात् कारणात् सः समाजस्य अप्रयोजकः जनः जातः । अतः तं दृष्ट्वा सर्वे जनाः उपहासं कुर्वन्ति । तेन दुःखितः सोमदेवः “अहं कथमपि विद्यां साधयेयम्” इति मनसा निर्णयं करोति । अतः तपसा विद्यां साधयितुम् इच्छन् गङ्गातीरं गत्वा तपः आचरितवान् । तदा देवाधिपतिः इन्द्रः आगत्य ” तपसा विद्याध्ययनं कर्तुं न शक्यते । विद्याध्ययनार्थं गुरोः समीपं गन्तव्यम् । गुरोः उपदेशात् एव विद्याप्रप्तिः भवेत् । आदौ अक्षराभ्यासः ततः विद्याध्ययनं भवेत् । तदा मानवः विद्यावान् भवति ” इति उपदिशति । ततः गुरोः समीपं गत्वा अध्ययनं कृत्वा विद्यावान् भविष्यति ।

**अ) एकपदेन उत्तरत- ( केवलं प्रश्नद्वयम् )** **1 X 2 = 2**

i) देवाधिपति: क: ?

ii) बाल्ये वयसि सोमदेवः किं न कृतवान् ?

iii) कस्य उपदेशात् एव विद्याप्राप्तिः भवेत् ?

**आ) पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम् )** **2 X 2 = 4**

i) सोमदेवः मनसा किं निर्णयं करोति ?

ii) सोमदेवं दृष्ट्वा जना: किं कुर्वन्ति स्म ?

iii) सोमदेव: कुत्र गत्वा तप: आचरितवान् ?

**इ) अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत-** **1 X 1 = 1**

**ई) यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम् ) -** **1 X 3 = 3**

i) 'करोति' इति क्रियापदस्य कर्तृपदं किम्?

क) कथमपि ख) सोमदेवः ग) अहम् घ) विद्या

ii) 'अन्ते ' इति पदस्य किं विलोमपदम् अनुच्छेदे अस्ति ?

क) दूरम् ख) आदौ ग) समीपम् घ) गन्तव्यम्

iii) "तं दृष्ट्वा सर्वे उपहसन्ति " अत्र तम् इति सर्वनामपदं कस्मै प्रयुक्तम् ?

क) मानवाय ख) इन्द्राय ग) जनेभ्यः घ) सोमदेवाय

iv) "बाल्ये वयसि" अत्र विशेषणपदं किम् ?

क) बाल्ये ख) कृतवान् ग) वयसि घ) कश्चन

**ख खण्ड:- रचनात्मकं कार्यम् (15 अङ्का:)**

**2.** भवान् मोहन: । छात्रावासे वसति । भवान् शैक्षिक यात्रार्थं गन्तुम् इच्छति । तदर्थं द्विसहस्रारूप्यकाणि प्रेषयितुं पितरं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयत । ½ x10=5

उडुपि नगरम्

i)-------------

आदरणीयाः ii) --------------!


सादरं प्रणामाः। अहम अत्र iii)-----------। चिन्त्यते मया भवन्तः सर्वे अपि कुशलिनः इति । मम iv) ----------------- सम्यक् प्रचलति । अस्मिन् वर्षे v)---------- विद्यलयस्य छात्राः vi)---------आग्रानगरं गमिष्यन्ति। अहम् अपि तैः सह गन्तुम् vii) ------------ । तदर्थं मया viii)----------- प्रदेयानि । अतः भवन्तः तद्धनं सम्प्रेष्य यात्रार्थम् ix) ---------------कल्पयन्तु इति, प्रार्थये। मातरं प्रति मम प्रणामं निवेदयन्तु ।

भवताम् विधेयः पुत्रः

x)---------------

| |
|---|
| अस्माकं, पितृपादाः, इच्छामि , द्विसहस्ररूप्यकाणि, अध्ययनं, अवसरं, शैक्षिकयात्रार्थं, कुशली,मोहनः,छात्रावासतः |

3 चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतभाषायां पञ्चवाक्यानि लिखत। 1x5=5



| |
|---|
| वृक्षाः,उद्यानस्य, अस्ति, कारयानम्, भ्रमन्ति, क्रीडतः, सन्ति,द्विचक्रिकाः, गृहाणि, जनाः, इदं विश्रामम्, करोति, बहिः, वातावरणम्, कुक्कुरः,मध्ये, उत्सः, एकः, वर्तते , |

**अथवा / OR**

**कोष्ठके दत्त-पदानां साहाय्येन " दीपावली-उत्सव: " विषयम् अधिकृत्य संस्कृतेन पञ्चवाक्यानि रचयत-**

| |
|---|
| भारतस्य , सामाजिकः , सर्वे , धारयन्ति , नववस्त्राणि , स्वादुवितरणम् ,आनन्देन , रङ्गवल्ली , अलङ्करणम् , बालाः , उत्साहेन , दीपम् , प्रज्ज्वालयन्ति , दीपमालाभिः , विद्युद्दीपैः , |

**4.** मित्रयोः वार्तालापं/संवादं मञ्जूषायां प्रदत्तवाक्यैः पूरयत - **1 x 5 = 5**

विशालः नमो नमः । कथम् अस्ति भवान् ! भो मित्र :?

आनन्दः ------------------------ अहं कुशलः॥ अधुना ! मित्र (1)

विशालः भवतः प्रियं पुस्तकं किम् अस्ति ? एवं वा : ?

आनन्दः --------------------------------- :------------------(2)

विशालः बहुसमीचीनम् ।महाभारतस्य रचयिता कः ? तथा वा : ?

आनन्दः --------------------------------- :---------- ----------(3)

विशालः अस्तु । महाभारते कस्य चरित्रं वि :द्यते ?

आनन्दः --------------------------------- :--------------------(4)

विशालः महाभारते कति श्लोकाः सन्ति : ?

आनन्दः --------------------------------- :---------------------(5)

विशालः अहम् अपि इदं काव्यं पठामि। अ ! एवं वा :स्तु पुनः मिलामः ।

**A.** मम प्रियं पुस्तकं महाभारतम् अस्ति । **B.** एकं पुस्तकं पठन् अस्मि । **C.** अस्मिन् काव्ये सहस्राधिकाः श्लोकाः सन्ति । **D**. भगवान् वेदव्यासःअस्य रचयिता । **E.**कौरवपाण्डवयोः युद्धस्य चरित्रं श्लोकरूपेण निरूपितं विद्यते ।

**अथवा**

**मञ्जूषायाः सहायतया अधोलकितकथां पूरयित्वा पुनः लिखत -**

सायङ्काले ---------(1) गच्छन् ---------(2) सूर्यःविचारमग्नः अभवत् -"मयि अस्तंगते सम्पूर्णः संसारः ---------(3) निमग्नः भवति । ---------(4) व्यवहारः कथं चलिष्यति ? मां विना सर्वे ---------------(5) कष्टम् अनुभविष्यन्ति। तस्य एतं भावं ---------(6) एकः लघुदीपः ---------(7) निवेदितवान् –"भगवन् ! अलं चिन्तया ।यद्यपि ------------(8)प्रकाशः क्षीणः तथापि ---------(9) सेवायाम् अहं यथाशक्ति ------------(10)समर्पयिष्यामि , कार्याणि च साधयिष्यामि " इति ।

| लोकानाम्, भगवान् ,स्वजीवनम् ,मम ,अन्धकारे,अस्ताचलम्,जनानाम् ,सविनयम् ,जीवाः, विज्ञाय |
|---|

**'ग' खण्ड: - <u>अनुप्रयुक्तं</u> <u>व्याकरणम्</u> – (25 अङ्का:)**

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत (चतुर्णाम् एव ) 1 x 4 = 4**

1. आसीत् दुष्टबुद्धि: नाम <u>कश्चित्</u> चोर:
2. अत्र <u>संस्कृत + छात्रा</u>: पठन्ति ।
3. वानरा: <u>इतस्तत:</u> अधावन् ।
4. <u>पापिनाञ्च</u> सदा दु:खम्।
5. केन <u>प्रयुक्तोऽयं</u> पापं चरति ।

6. **रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत (चतुर्णाम् एव) 1 x 4 = 4**

1) शक्र: अपि तत् नेत्रं **<u>स्थानम् अनतिक्रम्य</u>** अस्थापयत् ।

क) अनुस्थानम् ख) प्रतिस्थानम् ग ) यथास्थानम्

2) **<u>पिककाकौ</u>** उड्डीयेते।

क) पिकः च काकाः च ख) पिकः च काकः च ग) काकस्य च पिकः च

3) **<u>सर्वदा</u>** शारदा अस्माकं वदनाम्बुजे सन्निधिं कुर्यात् ।

क) सर्वं ददाति इति ख) सर्वम् आददातीति ग) सर्वैः दीयते इति

4) राजा बोधिसत्व: **<u>शास्त्रेषु पारङ्गत:</u>** आसीत्

क) सशास्त्रम् ख) शास्त्रपारङ्गत: ग) यथा शास्त्रम्

5) वाक्यम् **<u>अनुद्वेगकरं</u>** सत्यं प्रियहित च भवेत्

क) न उद्वेगकरम् ख) अन् उद्वेगकरम् ग) नो द्वेगकरम्

**7. रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत- (चतुर्णाम् एव) 1 x 4 = 4**

1) यथा चित्ते **<u>अवक्रता</u>** भवेत् तथा वाचि अपि भवेत्

क) अवक्र+टाप् ख) अवक्र + तल् ग) अवक्र + मतुप्

2) अन्योऽपि **<u>बुद्धिमान्</u>** लोके

क) बुद्धि + मतुप्　　ख) बुद्धि + मान्　　ग) बुद्धि + क्त

3) लोके परपीडनं **<u>राक्षस + त्व</u>** इति कथ्यते ।

क) राक्षसत्वं　　ख) राक्षसेन　　ग) राक्षसत्वेन

4) विद्यालये **मास** + **ठक्** परीक्षा भवति

क) मासिकः　　ख) मासिकी　　ग) मासिकं

5) **<u>रमणीया</u>** हि सृष्टिरेषा

क) रमणीय +आ　　ख) रमणीय +टाप्　　ग) रमणी+ङीप्

**8. वाच्यस्य नियमानुसारम् उचितं पदं चित्वा संवादं पुनः लिखत – (त्रयाणाम् एव )　　1 x 3 = 3**

1. अरुण:अभ - िनव किं ......... क्रीडितु !म् आगच्छसि ?
2. आभिनवः - न , मया तु अधुना पाठ । ............. :
3. अरुणः -एवं चेत् ...............अपि गणितस्य अभ्यासं करोमि।
4. अभिनवः मया _______ पठ्यते ।

| | | | |
|---|---|---|---|
| अहम् | पठ्यते | इतिहासः | त्वम् |

**9. समयवाचकपदैः रिक्तस्थानानि पूरयत - (त्रयाणाम् एव)　　1 x 3 = 3**

1) छात्राः ____ ( 7. 45) वादने विद्यालयं गच्छन्ति ।

2) छात्राः ______ ( 8.15( वादने प्रार्थनां कुर्वन्ति ।

3) छात्राः )8.30 ( ______ वादने कक्षांयाम् उपविशन्ति ।

4) छात्राः (3.00) ________ वादने गृहं गच्छन्ति ।

**10. प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत ( चतुर्णाम् एव)　　1 x 4 = 4**

1) लता मेधा __________ पाठं पठतः ।

2) अद्य रविवासरः अस्ति, __________ सोमवासरः भविष्यति।

3) _________ त्वं गृहं गच्छ।

4) _________ परमास्त्रस्य प्रयोग: भवति तत्र वृष्टि: न भविष्यति।

5) त्वं ________ ग्रामं गमिष्यसि?

| शव: | च | कदा | यत्र | अधुना |
|---|---|---|---|---|

**11. रेखाङ्कित-अशुद्धपदाय विकल्पेभ्य: शुद्धं पदं चित्वा वाक्यानि पुन: लिखत – (त्रयाणाम् एव)**

**1 x 3 = 3**

1 सभायां शतं .(जन :सन्ति ।

क ) जनानां  ख ) जनस्य  ग) जना :  घ) जनान्

2 . ( यूयं संस्कृत पुस्तकं पठसि।

क ) अहम्  ख ) त्वं  ग) स  :घ) वयं

3 सरोवरे . (कमला: विकसन्ति ।

क ) कमलम्  ख ) कमले  ग) कमलानि  घ) कमलानां

4 . (किं सा कुपित: एवं भणति ?

क ) कुपिते  ख ) कुपितानि  ग) कुपिता  घ) कुपितानां

**घ खण्ड: पठित-अवबोधनम् ( 30 अङ्का:)**

**12. गद्यांशं पठित्वा प्रश्नान् उत्तरत-** 5

अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्टेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति। दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः। ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्।

I.एकपदेन उत्तरं लिखत - (**केवलं प्रश्नद्वयम्**) ½ x2=1

क) क: महानसं प्रविशति?

ख) तृणेषु काः समुत्थिताः ?

ग) क: अश्वशालां प्रविशति ?

II. पूर्णवाक्येन उत्तरं लिखत - (केवलं प्रश्नद्वयम्) 1x2=2

क) वह्निना जाज्वल्यमानशरीरः मेषः किं करोति ?

ख) अश्वा: किमर्थम् इतस्तत: अधावन् ?

ग) सूपकार: केन मेषं ताडयति ?

III. निर्देशानुसारम् उत्तरं लिखत - (केवलं प्रश्नद्वयम्) 1x2=2

क) अत्र ' प्रविशति ' अस्य क्रियापदस्य कर्तृपदं किम् ?

ख) 'ज्वालमालाकुलाः अश्वाः' अत्र विशेषणपदं किम्?

ग) 'पाकगृहम्' अस्य पर्यायपदम् अनुच्छेदे किमस्ति ?

13. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत -5

**न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।**
**प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी ॥**
**आचार्यात् पादमादत्ते पादं शिष्य: स्वमेधया।**
**कालेन पादमादत्ते पादं सब्रह्मचारिभि:॥**

I. प्रश्नानाम् उत्तराणि एकपदेन लिखत | (केवलं प्रश्नद्वयम्) ½ x2=1

क) कीदृशी वाणी पुरुषं प्रह्लादयति?

ख) शिष्य: कस्मात् पादम् आदत्ते?

ग) कीदृशी छाया मनुष्यं प्रसन्नं न करोति?

II. पूर्णवाक्येन उत्तरं लिखत | (केवलं प्रश्नद्वयम्) 2x1=2

क) कस्य रस: पुरुषं न प्रह्लादयति ?

ख) क: स्वमेधया पादम् आदत्ते ?

ग) यथा मधुरभाषिणी वाणी प्रह्लादयति तथा किं किं न प्रह्लादयति ?

III. यथानिर्देशम् उत्तरं लिखत – (केवलं प्रश्नद्वयम् ) 1X2=2

क) चतुर्थांशम् इत्यर्थे श्लोके किं पदं प्रयुक्तम् ?

ख) प्रह्लादयति क्रियपदस्य कर्तृपदं किम् ?

ग) गुरोः पदस्य समानार्थकं पदं किमस्ति ?

14. संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

देवाधिपतिः इन्द्रः राज्ञः दानशिलतां परीक्षितुं नेत्रहीनयाचकरूपं धारयित्वा तत्पुरतः अवदत् ।

नेत्रहीनयाचकः - ( राजानम् उपेत्य)हे राजन् ! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि । देव ! रविशशितारामण्डलभूषितम् एतत् जगत् कथमहं पश्येयं चक्षुर्हीनः !

राजा - भगवन् ! भवन्मनोरथं पूरयित्वा आत्मानम् अनुग्रहीतं कर्तुम् इच्छामि । आदिश्यताम् किं करवाणि?

याचकः - यदि भवान् प्रीतः तर्हि त्वत्तः एकस्य चक्षुषः दानमिच्छामि। येन मम लोकयात्रा निर्बाधा स्यात्

राजा- ( स्वगतम्) लोके चक्षुर्दानं दुष्करम् एव, नूनम् ईदृशं दानमिच्छन् अयं केनापि प्रेरितः स्यात् । अथवा किम् बहु चिन्तनेन! ।

I. प्रश्नानाम् उत्तरम् एकपदेन लिखत । (प्रश्नद्वयमेव) ½ x2=1

क) इन्द्रः कः ?

ख) लॊके कस्य दानं दुष्करम् ?

ग) कस्य दानशीलतां परीक्षितुम् इन्द्रः आगच्छति ?

II. पूर्णवाक्येन उत्तरं लिखत | (प्रश्नद्वयमेव) 1x2=2

क) जगत् किं भूषितम् अस्ति ?

ख) इन्द्रः कस्य रूपं धारयित्वा राज्ञः पुरतः आगच्छति ?

ग) कः लोकयात्रां कर्तुम् इच्छति ?

III. निर्देशानुसारम् उत्तरं लिखत | (प्रश्नद्वयमेव) 1x2=2

क) 'श्रुत्वा' इत्यर्थे संवादे किं पदमस्ति ?

ख) लोकयात्रा निर्बाधा अत्र किं विशेष्यम् ?

ग) 'सुकरं' अस्य किं विलोमपदमत्र प्रयुक्तम् अस्ति ?

15. रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्नाः) 1x5=5

क) देवाधिपतिः इन्द्रः गच्छति ।

ख) त्वं विद्यालयं गच्छसि ।

ग) रवि वासरे विरामः भवति ।

घ) राजा पुत्रवत् प्रजाः पालयति स्म ।

ङ) राजहंसः सरस्तीरे विहरति ।

च) सः <u>परेभ्यः</u> अहितं न कुर्यात् ।

16. श्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा लिखत | ½ x4=2

I. दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः ।
कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः ॥

अन्वयः – यः दास्यामि इति 1)__________ मनः अन्यथा 2)__________ । कार्पण्य 3)__________ ततः पापतरः कः 4)__________ ।

| कुरुते, | अनिश्चितमतेः, | प्रतिज्ञाय, | स्यात्, |
|---|---|---|---|

---- अथवा----

**कोष्टक पदसाहाय्येन भावं पूरयत -**

तस्मात्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ! ।
पाप्मानं प्रजहि ह्येनं ज्ञनविज्ञाननाशनम् ॥

तस्मात् कारणात् हे ......................त्वं सर्वप्रथमं ...................... स्व वशे कृत्वा एनं ज्ञानविज्ञान संहर्तारम् .................... आत्मानं यावत् शीघ्रम् ........................ इति ।

| पापशीलम् , भरतकुलश्रेष्ठ ! , विनाशय, इन्द्रियाणि |
|---|

17. प्रसङ्गानुसारम् अर्थं विकल्पात्  चित्वा लिखत ।   (केवलं प्रश्नचतुष्टयम्)        1x4=4

i) शैलानां पारं द्रष्टुं समर्थः भव ।

क) गृहाणाम्   ख) पर्वतानाम्   ग) मेघानां   घ) वृक्षाणाम्

ii) अलं मिथ: कलहेन ।

क) मितम्   ख) परस्परम्   ग) मिथ्या   घ) मधुरम्

iii) गुरुषु अवधीरणा  विषम् ।

क) महाधारणा   ख) पुरस्कारः   ग) साधारणम्   घ) तिरस्कारः

iv) अमात्याः विषण्णाः भूत्वा अवदन् ।

क) विवेकिनः   ख) सन्तुष्टाः   ग) जागरिताः   घ) दुःखिताः

v) न जानाति भवान् द्रौणे: चपलां प्रकृतिम्

क) स्वभावम्   ख) मूलम्   ग) मूलधातुं   घ) संस्कारम्

18. प्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथां पुन: लिखत        ½ x8=4

शिवीनां राजा बाल्यादेव 1______ सर्वशास्त्रपारङ्गतश्च आसीत् । स: पुत्रवत 2____ पालयति स्म। राजा नगरस्य समन्तत: 3____________ अकारयत् ।एकदा दानशालासु विचरन् राजा अचिन्तयत् । नूनं ते
4_____ सौभाग्यशालिन: यान् याचका: 5_______ अङ्गानि अपि याचन्ते ।एकदा देवाधिपति: इन्द्र: नेत्रहीन याचकस्य रूपं 6________ राज्ञ: पुरत: आगच्छति । लोकयात्रा 7_______ भवेदिति नेत्रदानार्थं राजानं प्रार्थयति ।याचकस्य मनोरथं पूरयितुम् राजा नेत्रदानं करोति। कतिपय दिनानन्तरम् एकदा 8________ समीपे राज्ञ: पुरत: पुन: इन्द्र: उपस्तित: भवति। स: आत्मन: सत्यपुण्यबलेन राज्ञ: चक्षुर्द्वयं प्रतिष्ठितम् अभवत् ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| सरोवरस्य | निर्बाधा | धारयित्वा | शरीरस्य | दानवीरा: | दानशाला: | प्रजा: | विनयशील: |